# Shri Kali Sahasranama Stotram

# શ્રીકાલીસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : kAlikA-sahasranAma-stotram

File name : kaalikaasahasra.itx

Category : sahasranAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : Ravin Bhalekar ravibhalekar at hotmail.com

Proofread by : Ravin Bhalekar, Shashipal Sharma, PSA Easwaran, Kirk Wortman

Latest update : April, 14, 2004, June 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 3, 2023

*sanskritdocuments.org*

# શ્રીકાલીસહસ્રનામસ્તોત્રમ્

કાલિકાકુલસર્વસ્વે

ભદ્રકાલીસહસ્રનામસ્તોત્રમ્

It is recommended to chant trailokyamohanakAlIkavacham before reciting the sahasranAma stotra or nAmAvalI

શ્રીગણેશાય નમઃ । ૐ શ્રીગુરુભ્યો નમઃ ।

ૐ ખડ્ગં ચક્રગદેષુચાપપરિઘાન્ શૂલં ભુશુણ્ડીં શિરઃ
    શઙ્ખં સન્દધતીં કુરૈસ્ત્રિનયનાં સર્વાઙ્ગભૂષાવૃતામ્ ।
યા મસ્તૌ સ્વપિતૌ હરૌ કમલજૌ હન્તું મધું કૈટભં
    નીલાશ્મદ્યુતિમાસ્યપાદદશકં સેવે મહાકાલિકામ્ ॥

ૐ સદ્યશ્છિન્ન શિરઃ કૃપાણમભયં હસ્તૈર્વરં બિભ્રતીં
    ઘોરાસ્યાં શિરસિ સ્રજા સુરુચિરાન્મુન્યુક્ત કેશાવલિમ્ ।
સૃક્કાસૃક્પ્રવહાં શ્મશાન નિલયાં શ્રુત્યોઃ શવાલઙ્કૃતિં
    શ્યામાઙ્ગીં કૃતમેખલાં શવકરૈર્દેવીં ભજે કાલિકામ્ ॥

રક્તાઙ્ગીં રક્તવસ્ત્રાં કરિવરવિલસત્ કુણ્ડલાં ચણ્ડદંષ્ટ્રાં
    કણ્ઠોદ્ય મુણ્ડમાલાં પરિસરવિલસદ્ભૂતપૈશાચવૃન્દામ્ ।
ઘોરાં ઘોરાટ્ટહાસાં કરકલિત કપાલાસિરૌદ્રાં ત્રિનેત્રાં
    શત્રૂણાં પ્રાણહન્ત્રીં શિશુશશિમકુટાં ભાવયેત્ ભદ્રકાલીં ॥

કાલિં મેઘસમપ્રભાં ત્રિનયનાં વેતાલકણ્ઠસ્થિતાં
    ખડ્ગં ખેટકપાલદારિકશિરઃ કૃત્વા કરાગ્રેષુ ચ ।
ભૂતપ્રેતપિશાચમાતૃસહિતાં મુણ્ડસ્રજાલઙ્કૃતાં
    વન્દે દુષ્ટમસૂરિકાદિ વિપદાં સંહારિણીં ઈશ્વરીમ્ ॥

ૐ હ્રીં ભં ભદ્રકાલ્યૈ નમઃ ।
ૐ ઐં ક્લીં સૌ ક્રીં ભદ્રકાલ્યૈ નમઃ ।

કથિતોઽયં મહામન્ત્રઃ સર્વમન્ત્રોત્તમોત્તમઃ ।
યમાસાદ્ય મયા પ્રાપ્તમૈશ્વર્યપદમુત્તમમ્ ॥ ૧॥

સંયુક્તઃ પરયા ભક્ત્યા યથોક્તવિધિના ભવાન્ ।
કુરુતામર્ચનં દેવ્યાઃ ત્રૈલોક્યવિજિગીષયા ॥ ૨॥

શ્રીપરશુરામ ઉવાચ ।
પ્રસન્નો યદિ મે દેવઃ પરમેશઃ પુરાતનઃ ।
રહસ્યં પરયા દેવ્યાઃ કૃપયા કથય પ્રભો ॥ ૩॥

યથાર્ચનં વિના હોમં વિના ન્યાસં વિનાબલિમ્ ।
વિના ગન્ધં વિના પુષ્પં વિના નિત્યોદિતક્રિયા ॥ ૪॥

પ્રાણાયામં વિના ધ્યાનં વિના ભૂતવિશોધનમ્ ।
વિના જાપ્યં વિના દાનં વિના કાલી પ્રસીદતિ ॥ ૫॥

શ્રીશઙ્કર ઉવાચ ।
પૃષ્ટં ત્વયોત્તમં પ્રાજ્ઞ ભૃગુવંશવિવર્ધનમ્ ।
ભક્તાનામપિ ભક્તોઽસિ ત્વમેવં સાધયિષ્યસિ ॥ ૬॥

દેવીં દાનવકોટિઘ્નીં લીલયા રુધિરપ્રિયામ્ ।
સદા સ્તોત્રપ્રિયામુગ્રાં કામકૌતુકલાલસામ્ ॥ ૭॥

સર્વદાઽઽનન્દહૃદયાં વાસવ્યાસક્તમાનસામ્ ।
માધ્વીકમત્સ્યમાંસાદિરાગિણીં રુધિરપ્રિયામ્ ॥ ૮॥

શ્મશાનવાસિનીં પ્રેતગણનૃત્યમહોત્સવામ્ ।
યોગપ્રભાં યોગિનીશાં યોગીન્દ્રહૃદયે સ્થિતામ્ ॥ ૯॥

તામુગ્રકાલિકાં રામ પ્રસાદયિતુમર્હસિ ।
તસ્યાઃ સ્તોત્રં મહાપુણ્યં સ્વયં કાલ્યા પ્રકાશિતમ્ ॥ ૧૦॥

તવ તત્કથયિષ્યામિ શ્રુત્વા વત્સાવધારય ।
ગોપનીયં પ્રયત્નેન પઠનીયં પરાત્પરમ્ ॥ ૧૧॥

યસ્યૈકકાલપઠનાત્સર્વે વિઘ્નાઃ સમાકુલાઃ ।
નશ્યન્તિ દહને દીપ્તે પતઙ્ગા ઇવ સર્વતઃ ॥ ૧૨॥

ગદ્યપદ્યમયી વાણી તસ્ય ગઙ્ગાપ્રવાહવત્ ।
તસ્ય દર્શનમાત્રેણ વાદિનો નિષ્પ્રભા મતાઃ ॥ ૧૩॥

રાજાનોઽપિ ચ દાસત્વં ભજન્તિ ચ પરે જનાઃ ।
તસ્ય હસ્તે સદૈવાસ્તિ સર્વસિદ્ધિર્ન સંશયઃ ॥ ૧૪॥

નિશીથે મુક્તયે શમ્ભુર્નગ્નઃ શક્તિસમન્વિતઃ ।
મનસા ચિન્તયેત્કાલીં મહાકાલીતિ લાલિતામ્ ॥ ૧૫॥

પઠેત્સહસ્રનામાખ્યં સ્તોત્રં મોક્ષસ્ય સાધનમ્ ।
પ્રસન્ના કાલિકા તસ્ય પુત્રત્વેનાનુકમ્પતે ॥ ૧૬॥

વેધા બ્રહ્માસ્મૃતેર્બ્રહ્મ કુસુમૈઃ પૂજિતા પરા ।
પ્રસીદતિ તથા કાલી યથાનેન પ્રસીદતિ ॥ ૧૭॥

ૐ અસ્ય શ્રીકાલિકાસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય
મહાકાલભૈરવ ઋષિઃ
અનુષ્ટુપ્ છન્દઃ શ્મશાનકાલિકા દેવતા
મહાકાલિકાપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ધ્યાનમ્ ।
શવારૂઢાં મહાભીમાં ઘોરદંષ્ટ્રાં હસન્મુખીમ્ ।
ચતુર્ભુજાં ખડ્ગમુણ્ડવરાભયકરાં શિવામ્ ॥

મુણ્ડમાલાધરાં દેવીં લોલજ્જિહ્વાં દિગમ્બરામ્ ।
એવં સઞ્ચિન્તયેત્કાલીં શ્મશાનાલયવાસિનીમ્ ॥

અથ સ્તોત્રમ્ ।
ૐ ક્રીં મહાકાલ્યૈ નમઃ ॥

ૐ શ્મશાનકાલિકા કાલી ભદ્રકાલી કપાલિની ।
ગુહ્યકાલી મહાકાલી કુરુકુલ્લા વિરોધિની ॥ ૧૮॥

કાલિકા કાલરાત્રિશ્ચ મહાકાલનિતમ્બિની ।
કાલભૈરવભાર્યા ચ કુલવર્ત્મપ્રકાશિની ॥ ૧૯॥

કામદા કામિની કામ્યા કામનીયસ્વભાવિની ।
કસ્તૂરીરસનીલાઙ્ગી કુઞ્જરેશ્વરગામિની ॥ ૨૦॥

કકારવર્ણસર્વાઙ્ગી કામિની કામસુન્દરી ।
કામાર્તા કામરૂપા ચ કામધેનુઃ કલાવતી ॥ ૨૧॥

કાન્તા કામસ્વરૂપા ચ કામાખ્યા કુલપાલિની ।

કુલીના કુલવત્યમ્બા દુર્ગા દુર્ગાર્તિનાશિની ॥ ૨૨॥

કૌમારી કુલજા કૃષ્ણા કૃષ્ણદેહા કૃશોદરી ।
કૃશાઙ્ગી કુલિશાઙ્ગી ચ ક્રીઙ્કારી કમલા કલા ॥ ૨૩॥

કરાલાસ્યા કરાલી ચ કુલકાન્તાઽપરાજિતા ।
ઉગ્રા ચોગ્રપ્રભા દીપ્તા વિપ્રચિત્તા મહાબલા ॥ ૨૪॥

નીલા ઘના બલાકા ચ માત્રામુદ્રાપિતાઽસિતા ।
બ્રાહ્મી નારાયણી ભદ્રા સુભદ્રા ભક્તવત્સલા ॥ ૨૫॥

માહેશ્વરી ચ ચામુણ્ડા વારાહી નારસિંહિકા ।
વજ્રાઙ્ગી વજ્રકઙ્કાલી નૃમુણ્ડસ્રગ્વિણી શિવા ॥ ૨૬॥

માલિની નરમુણ્ડાલી ગલદ્રક્તવિભૂષણા ।
રક્તચન્દનસિક્તાઙ્ગી સિન્દૂરારુણમસ્તકા ॥ ૨૭॥

ઘોરરૂપા ઘોરદંષ્ટ્રા ઘોરાઘોરતરા શુભા ।
મહાદંષ્ટ્રા મહામાયા સુદતી યુગદન્તુરા ॥ ૨૮॥

સુલોચના વિરૂપાક્ષી વિશાલાક્ષી ત્રિલોચના ।
શારદેન્દુપ્રસન્નાસ્યા સ્ફુરત્સ્મેરામ્બુજેક્ષણા ॥ ૨૯॥

અટ્ટહાસપ્રસન્નાસ્યા સ્મેરવક્ત્રા સુભાષિણી ।
પ્રસન્નપદ્મવદના સ્મિતાસ્યા પ્રિયભાષિણિ ॥ ૩૦॥

કોટરાક્ષી કુલશ્રેષ્ઠા મહતી બહુભાષિણી ।
સુમતિઃ કુમતિશ્ચણ્ડા ચણ્ડમુણ્ડાતિવેગિની ॥ ૩૧॥

પ્રચણ્ડા ચણ્ડિકા ચણ્ડી ચર્ચિકા ચણ્ડવેગિની ।
સુકેશી મુક્તકેશી ચ દીર્ઘકેશી મહત્કચા ॥ ૩૨॥

પ્રેતદેહા કર્ણપૂરા પ્રેતપાણિસુમેખલા ।
પ્રેતાસના પ્રિયપ્રેતા પ્રેતભૂમિકૃતાલયા ॥ ૩૩॥

શ્મશાનવાસિની પુણ્યા પુણ્યદા કુલપણ્ડિતા ।
પુણ્યાલયા પુણ્યદેહા પુણ્યશ્લોકી ચ પાવની ॥ ૩૪॥

પુત્રા પવિત્રા પરમા પુરાપુણ્યવિભૂષણા ।
પુણ્યનામ્ની ભીતિહરા વરદા ખડ્ગપાણિની ॥ ૩૫॥

નૃમુણ્ડહસ્તશસ્તા ચ છિન્નમસ્તા સુનાસિકા ।
દક્ષિણા શ્યામલા શ્યામા શાન્તા પીનોન્નતસ્તની ॥ ૩૬॥

દિગમ્બરા ઘોરરાવા સૃક્કાન્તા રક્તવાહિની ।
ઘોરરાવા શિવા ખડ્ગા વિશઙ્કા મદનાતુરા ॥ ૩૭॥

મત્તા પ્રમત્તા પ્રમદા સુધાસિન્ધુનિવાસિની ।
અતિમત્તા મહામત્તા સર્વાકર્ષણકારિણી ॥ ૩૮॥

ગીતપ્રિયા વાદ્યરતા પ્રેતનૃત્યપરાયણા ।
ચતુર્ભુજા દશભુજા અષ્ટાદશભુજા તથા ॥ ૩૯॥

કાત્યાયની જગન્માતા જગતી પરમેશ્વરી ।
જગદ્બન્ધુર્જગદ્ધાત્રી જગદાનન્દકારિણી ॥ ૪૦॥

જન્મમયી હૈમવતી મહામાયા મહામહા ।
નાગયજ્ઞોપવીતાઙ્ગી નાગિની નાગશાયિની ॥ ૪૧॥

નાગકન્યા દેવકન્યા ગન્ધર્વી કિન્નરેશ્વરી ।
મોહરાત્રી મહારાત્રી દારુણા ભાસુરામ્બરા ॥ ૪૨॥

વિદ્યાધરી વસુમતી યક્ષિણી યોગિની જરા ।
રાક્ષસી ડાકિની વેદમયી વેદવિભૂષણા ॥ ૪૩॥

શ્રુતિઃ સ્મૃતિર્મહાવિદ્યા ગુહ્યવિદ્યા પુરાતની ।
ચિન્ત્યાઽચિન્ત્યા સ્વધા સ્વાહા નિદ્રા તન્દ્રા ચ પાર્વતી ॥ ૪૪॥

અપર્ણા નિશ્ચલા લોલા સર્વવિદ્યા તપસ્વિની ।
ગઙ્ગા કાશી શચી સીતા સતી સત્યપરાયણા ॥ ૪૫॥

નીતિસ્સુનીતિસ્સુરુચિસ્તુષ્ટિઃ પુષ્ટિર્ધૃતિઃ ક્ષમા ।
વાણી બુદ્ધિર્મહાલક્ષ્મીર્લક્ષ્મીર્નીલસરસ્વતી ॥ ૪૬॥

સ્રોતસ્વતી સરસ્વતી માતઙ્ગી વિજયા જયા ।
નદી સિન્ધુઃ સર્વમયી તારા શૂન્યનિવાસિની ॥ ૪૭॥

શુદ્ધા તરઙ્ગિણી મેધા લાકિની બહુરૂપિણી ।
સ્થૂલા સૂક્ષ્મા સૂક્ષ્મતરા ભગવત્યનુરૂપિણી ॥ ૪૮॥

પરમાણુસ્વરૂપા ચ ચિદાનન્દસ્વરૂપિણી ।
સદાનન્દમયી સત્યા સર્વાનન્દસ્વરૂપિણી ॥ ૪૯॥

સુનન્દા નન્દિની સ્તુત્યા સ્તવનીયસ્વભાવિની ।
રઙ્ગિણી ટઙ્કિની ચિત્રા વિચિત્રા ચિત્રરૂપિણી ॥ ૫૦॥

પદ્મા પદ્માલયા પદ્મમુખી પદ્મવિભૂષણા ।
ડાકિની શાકિની ક્ષાન્તા રાકિણી રુધિરપ્રિયા ॥ ૫૧॥

ભ્રાન્તિર્ભવાની રુદ્રાણી મૃડાની શત્રુમર્દિની ।
ઉપેન્દ્રાણી મહેન્દ્રાણી જ્યોત્સ્ના ચન્દ્રસ્વરૂપિણી ॥ ૫૨॥

સૂર્યાત્મિકા રુદ્રપત્ની રૌદ્રી સ્ત્રી પ્રકૃતિઃ પુમાન્ ।
શક્તિર્મુક્તિર્મતિર્માતા ભક્તિર્મુક્તિઃ પતિવ્રતા ॥ ૫૩॥

સર્વેશ્વરી સર્વમાતા શર્વાણી હરવલ્લભા ।
સર્વજ્ઞા સિદ્ધિદા સિદ્ધા ભવ્યા ભાવ્યા ભયાપહા ॥ ૫૪॥

કર્ત્રી હર્ત્રી પાલયિત્રી શર્વરી તામસી દયા ।
તમિસ્રા તામસી સ્થાણુઃ સ્થિરા ધીરા તપસ્વિની ॥ ૫૫॥

ચાર્વઙ્ગી ચઞ્ચલા લોલજિહ્વા ચારુચરિત્રિણી ।
ત્રપા ત્રપાવતી લજ્જા વિલજ્જા હરયૌવતી ॥ ૫૬॥ (હ્રી રજોવતી)

સત્યવતી ધર્મનિષ્ઠા શ્રેષ્ઠા નિષ્ઠુરવાદિની ।
ગરિષ્ઠા દુષ્ટસંહર્ત્રી વિશિષ્ટા શ્રેયસી ઘૃણા ॥ ૫૭॥

ભીમા ભયાનકા ભીમનાદિની ભીઃ પ્રભાવતી ।
વાગીશ્વરી શ્રીર્યમુના યજ્ઞકર્ત્રી યજુઃપ્રિયા ॥ ૫૮॥

ઋક્સામાથર્વનિલયા રાગિણી શોભના સુરા । (શોભનસ્વરા)
કલકણ્ઠી કમ્બુકણ્ઠી વેણુવીણાપરાયણા ॥ ૫૯॥

વંશિની વૈષ્ણવી સ્વચ્છા ધાત્રી ત્રિજગદીશ્વરી ।
મધુમતી કુણ્ડલિની ઋદ્ધિઃ શુદ્ધિઃ શુચિસ્મિતા ॥ ૬૦॥

રમ્ભોર્વશી રતી રામા રોહિણી રેવતી મખા ।
શઙ્ખિની ચક્રિણી કૃષ્ણા ગદિની પદ્મિની તથા ॥ ૬૧॥

શૂલિની પરિઘાસ્ત્રા ચ પાશિની શાર્ઙ્ગપાણિની ।
પિનાકધારિણી ધૂમ્રા સુરભી વનમાલિની ॥ ૬૨॥

રથિની સમરપ્રીતા વેગિની રણપણ્ડિતા ।

જટિની વજ્રિણી નીલા લાવણ્યામ્બુદચન્દ્રિકા ॥ ૬૩॥

બલિપ્રિયા સદાપૂજ્યા દૈત્યેન્દ્રમથિની તથા ।
મહિષાસુરસંહર્ત્રી કામિની રક્તદન્તિકા ॥ ૬૪॥

રક્તપા રુધિરાક્તાઙ્ગી રક્તખર્પરધારિણી ।
રક્તપ્રિયા માંસરુચિર્વાસવાસક્તમાનસા ॥ ૬૫॥

ગલચ્છોણિતમુણ્ડાલી કણ્ઠમાલાવિભૂષણા ।
શવાસના ચિતાન્તસ્થા મહેશી વૃષવાહિની ॥ ૬૬॥

વ્યાઘ્રત્વગમ્બરા ચીનચૈલિની સિંહવાહિની ।
વામદેવી મહાદેવી ગૌરી સર્વજ્ઞભામિની ॥ ૬૭॥

બાલિકા તરુણી વૃદ્ધા વૃદ્ધમાતા જરાતુરા ।
સુભ્રૂર્વિલાસિની બ્રહ્મવાદિની બ્રાહ્મણી સતી ॥ ૬૮॥

સુપ્તવતી ચિત્રલેખા લોપામુદ્રા સુરેશ્વરી ।
અમોઘાઽરુન્ધતી તીક્ષ્ણા ભોગવત્યનુરાગિણી ॥ ૬૯॥

મન્દાકિની મન્દહાસા જ્વાલામુખ્યઽસુરાન્તકા । (જ્વાલામુખી+અસુરાન્તકા)
માનદા માનિની માન્યા માનનીયા મદાતુરા ॥ ૭૦॥

મદિરામેદુરોન્માદા મેધ્યા સાધ્યા પ્રસાદિની ।
સુમધ્યાઽનન્તગુણિની સર્વલોકોત્તમોત્તમા ॥ ૭૧॥

જયદા જિત્વરી જૈત્રી જયશ્રીર્જયશાલિની ।
સુખદા શુભદા સત્યા સભાસઙ્ક્ષોભકારિણી ॥ ૭૨॥

શિવદૂતી ભૂતિમતી વિભૂતિર્ભૂષણાનના ।
કૌમારી કુલજા કુન્તી કુલસ્ત્રી કુલપાલિકા ॥ ૭૩॥

કીર્તિર્યશસ્વિની ભૂષા ભૂષ્ઠા ભૂતપતિપ્રિયા ।
સુગુણા નિર્ગુણાઽધિષ્ઠા નિષ્ઠા કાષ્ઠા પ્રકાશિની ॥ ૭૪॥ (પ્રતિષ્ઠિતા)

ધનિષ્ઠા ધનદા ધાન્યા વસુધા સુપ્રકાશિની ।
ઉર્વી ગુર્વી ગુરુશ્રેષ્ઠા ષડ્ગુણા ત્રિગુણાત્મિકા ॥ ૭૫॥

રાજ્ઞામાજ્ઞા મહાપ્રાજ્ઞા સુગુણા નિર્ગુણાત્મિકા ।
મહાકુલીના નિષ્કામા સકામા કામજીવના ॥ ૭૬॥

કામદેવકલા રામાઽભિરામા શિવનર્તકી ।
ચિન્તામણિઃ કલ્પલતા જાગ્રતી દીનવત્સલા ॥ ૭૭॥

કાર્તિકી કૃત્તિકા કૃત્યા અયોધ્યા વિષમા સમા ।
સુમન્ત્રા મન્ત્રિણી ઘૂર્ણા હ્લાદિની ક્લેશનાશિની ॥ ૭૮॥

ત્રૈલોક્યજનની હૃષ્ટા નિર્માંસામલરૂપિણી ।
તડાગનિમ્નજઠરા શુષ્કમાંસાસ્થિમાલિની ॥ ૭૯॥

અવન્તી મધુરા હૃદ્યા ત્રૈલોક્યાપાવનક્ષમા ।
વ્યક્તાઽવ્યક્તાઽનેકમૂર્તી શારભી ભીમનાદિની ॥ ૮૦॥

ક્ષેમઙ્કરી શાઙ્કરી ચ સર્વસમ્મોહકારિણી ।
ઊર્દ્ધ્વતેજસ્વિની ક્લિન્ના મહાતેજસ્વિની તથા ॥ ૮૧॥

અદ્વૈતા યોગિની પૂજ્યા સુરભી સર્વમઙ્ગલા ।
સર્વપ્રિયઙ્કરી ભોગ્યા ધનિની પિશિતાશના ॥ ૮૨॥

ભયઙ્કરી પાપહરા નિષ્કલઙ્કા વશઙ્કરી ।
આશા તૃષ્ણા ચન્દ્રકલા નિદ્રાણા વાયુવેગિની ॥ ૮૩॥

સહસ્રસૂર્યસઙ્કાશા ચન્દ્રકોટિસમપ્રભા ।
નિશુમ્ભશુમ્ભસંહર્ત્રી રક્તબીજવિનાશિની ॥ ૮૪॥

મધુકૈટભસંહર્ત્રી મહિષાસુરઘાતિની ।
વહ્નિમણ્ડલમધ્યસ્થા સર્વસત્ત્વપ્રતિષ્ઠિતા ॥ ૮૫॥

સર્વાચારવતી સર્વદેવકન્યાધિદેવતા ।
દક્ષકન્યા દક્ષયજ્ઞનાશિની દુર્ગતારિણી ॥ ૮૬॥

ઇજ્યા પૂજ્યા વિભા ભૂતિઃ સત્કીર્તિર્બ્રહ્મચારિણી ।
રમ્ભોરૂશ્ચતુરા રાકા જયન્તી વરુણા કુહૂઃ ॥ ૮૭॥

મનસ્વિની દેવમાતા યશસ્યા બ્રહ્મવાદિની ।
સિદ્ધિદા વૃદ્ધિદા વૃદ્ધિઃ સર્વાદ્યા સર્વદાયિની ॥ ૮૮॥

આધારરૂપિણી ધ્યેયા મૂલાધારનિવાસિની ।
આજ્ઞા પ્રજ્ઞા પૂર્ણમના ચન્દ્રમુખ્યનુકૂલિની ॥ ૮૯॥

વાવદૂકા નિમ્નનાભિઃ સત્યસન્ધા દૃઢવ્રતા ।
આન્વીક્ષિકી દણ્ડનીતિસ્ત્રયી ત્રિદિવસુન્દરી ॥ ૯૦॥

જ્વાલિની જ્વલિની શૈલતનયા વિન્ધ્યવાસિની ।
પ્રત્યયા ખેચરી ધૈર્યા તુરીયા વિમલાऽऽતુરા ॥ ૯૧ ॥

પ્રગલ્ભા વારુણી ક્ષામા દર્શિની વિસ્ફુલિઙ્ગિની ।
ભક્તિઃ સિદ્ધિઃ સદાપ્રાપ્તિઃ પ્રકામ્યા મહિમાऽણિમા ॥ ૯૨ ॥

ઇક્ષાસિદ્ધિર્વશિત્વા ચ ઇશિત્વોર્ધ્વનિવાસિની ।
લઘિમા ચૈવ સાવિત્રી ગાયત્રી ભુવનેશ્વરી ॥ ૯૩ ॥

મનોહરા ચિતા દિવ્યા દેવ્યુદારા મનોરમા ।
પિઙ્ગલા કપિલા જિહ્વા રસજ્ઞા રસિકા રસા ॥ ૯૪ ॥

સુષુમ્નેડા યોગવતી ગાન્ધારી નવકાન્તકા ।
પાઞ્ચાલી રુક્મિણી રાધા રાધ્યા ભામા ચ રાધિકા ॥ ૯૫ ॥

અમૃતા તુલસી વૃન્દા કૈટભી કપટેશ્વરી ।
ઉગ્રચણ્ડેશ્વરી વીરજનની વીરસુન્દરી ॥ ૯૬ ॥

ઉગ્રતારા યશોદાખ્યા દેવકી દેવમાનિતા ।
નિરઞ્જના ચિત્રદેવી ક્રોધિની કુલદીપિકા ॥ ૯૭ ॥

કુલરાગીશ્વરી જ્વાલા માત્રિકા દ્રાવિણી દ્રવા ।
યોગીશ્વરી મહામારી ભ્રામરી બિન્દુરૂપિણી ॥ ૯૮ ॥

દૂતી પ્રાણેશ્વરી ગુપ્તા બહુલા ડામરી પ્રભા ।
કુબ્જિકા જ્ઞાનિની જ્યેષ્ઠા ભુશુણ્ડી પ્રકટાકૃતિઃ ॥ ૯૯ ॥

દ્રાવિણી ગોપિની માયા કામબીજેશ્વરી પ્રિયા ।
શાકમ્ભરી કોકનદા સુસત્યા ચ તિલોત્તમા ॥ ૧૦૦ ॥

અમેયા વિક્રમા ક્રૂરા સમ્યક્છીલા ત્રિવિક્રમા ।
સ્વસ્તિર્હવ્યવહા પ્રીતિરુક્મા ધૂમ્રાર્ચિરઙ્ગદા ॥ ૧૦૧ ॥

તપિની તાપિની વિશ્વભોગદા ધારિણી ધરા ।
ત્રિખણ્ડા રોધિની વશ્યા સકલા શબ્દરૂપિણી ॥ ૧૦૨ ॥

બીજરૂપા મહામુદ્રા વશિની યોગરૂપિણી ।
અનઙ્ગકુસુમાऽનઙ્ગમેખલાऽનઙ્ગરૂપિણી ॥ ૧૦૩ ॥

અનઙ્ગમદનાऽનઙ્ગરેખાऽનઙ્ગકુશેશ્વરી ।

અનઙ્ગમાલિની કામેશ્વરી સર્વાર્થસાધિકા ॥ ૧૦૪॥

સર્વતન્ત્રમયી સર્વમોદિન્યાનન્દરૂપિણી ।
વજ્રેશ્વરી ચ જયિની સર્વદુઃખક્ષયઙ્કરી ॥ ૧૦૫॥ (વ્રજેશ્વરી)

ષડઙ્ગયુવતી યોગેયુક્તા જ્વાલાંશુમાલિની ।
દુરાશયા દુરાધારા દુર્જયા દુર્ગરૂપિણી ॥ ૧૦૬॥

દુરન્તા દુષ્કૃતિહરા દુર્ધ્યેયા દુરતિક્રમા ।
હંસેશ્વરી ત્રિલોકસ્થા શાકમ્ભર્યનુરાગિણી ॥ ૧૦૭॥

ત્રિકોણનિલયા નિત્યા પરમામૃતરઞ્જિતા ।
મહાવિદ્યેશ્વરી શ્વેતા ભેરુણ્ડા કુલસુન્દરી ॥ ૧૦૮॥

ત્વરિતા ભક્તિસંયુક્તા ભક્તિવશ્યા સનાતની ।
ભક્તાનન્દમયી ભક્તભાવિતા ભક્તશઙ્કરી ॥ ૧૦૯॥

સર્વસૌન્દર્યનિલયા સર્વસૌભાગ્યશાલિની ।
સર્વસમ્ભોગભવના સર્વસૌખ્યાનુરૂપિણી ॥ ૧૧૦॥

કુમારીપૂજનરતા કુમારીવ્રતચારિણી ।
કુમારીભક્તિસુખિની કુમારીરૂપધારિણી ॥ ૧૧૧॥

કુમારીપૂજકપ્રીતા કુમારીપ્રીતિદપ્રિયા ।
કુમારીસેવકાસઙ્ગા કુમારીસેવકાલયા ॥ ૧૧૨॥

આનન્દભૈરવી બાલભૈરવી બટુભૈરવી ।
શ્મશાનભૈરવી કાલભૈરવી પુરભૈરવી ॥ ૧૧૩॥

મહાભૈરવપત્ની ચ પરમાનન્દભૈરવી ।
સુરાનન્દભૈરવી ચ ઉન્માદાનન્દભૈરવી ॥ ૧૧૪॥

યજ્ઞાનન્દભૈરવી ચ તથા તરુણભૈરવી ।
જ્ઞાનાનન્દભૈરવી ચ અમૃતાનન્દભૈરવી ॥ ૧૧૫॥

મહાભયઙ્કરી તીવ્રા તીવ્રવેગા તરસ્વિની ।
ત્રિપુરા પરમેશાની સુન્દરી પુરસુન્દરી ॥ ૧૧૬॥

ત્રિપુરેશી પઞ્ચદશી પઞ્ચમી પુરવાસિની ।
મહાસમદશી ચૈવ ષોડશી ત્રિપુરેશ્વરી ॥ ૧૧૭॥

મહાઙ્કુશસ્વરૂપા ચ મહાચક્રેશ્વરી તથા ।
નવચક્રેશ્વરી ચક્રેશ્વરી ત્રિપુરમાલિની ॥ ૧૧૮॥

રાજચક્રેશ્વરી રાજ્ઞી મહાત્રિપુરસુન્દરી ।
સિન્દૂરપૂરરુચિરા શ્રીમત્ત્રિપુરસુન્દરી ॥ ૧૧૯॥

સર્વાઙ્ગસુન્દરી રક્તારક્તવસ્ત્રોત્તરીયકા ।
યવાયાવકસિન્દૂરરક્તચન્દનધારિણી ॥ ૧૨૦॥

યવાયાવકસિન્દૂરરક્તચન્દનરૂપધૃક્ ।
ચમરી બાલકુટિલા નિર્મલા શ્યામકેશિની ॥ ૧૨૧॥

વજ્રમૌક્તિકરત્નાઢ્યા કિરીટકુણ્ડલોજ્જ્વલા ।
રત્નકુણ્ડલસંયુક્તા સ્ફુરદ્ગણ્ડમનોરમા ॥ ૧૨૨॥

કુઞ્જરેશ્વરકુમ્ભોત્થમુક્તારઞ્જિતનાસિકા ।
મુક્તાવિદ્રુમમાણિક્યહારાઢ્યસ્તનમણ્ડલા ॥ ૧૨૩॥

સૂર્યકાન્તેન્દુકાન્તાઢ્યા સ્પર્શાશ્મગલભૂષણા ।
બીજપૂરસ્ફુરદ્બીજદન્તપઙ્ક્તિરનુત્તમા ॥ ૧૨૪॥

કામકોદણ્ડકાભુગ્નભ્રૂકટાક્ષપ્રવર્ષિણી । (ભુગ્ન curved)
માતઙ્ગકુમ્ભવક્ષોજા લસત્કનકદક્ષિણા ॥ ૧૨૫॥

મનોજ્ઞશષ્કુલીકર્ણા હંસીગતિવિડમ્બિની ।
પદ્મરાગાઙ્ગદદ્યોતદ્દોશ્ચતુષ્કપ્રકાશિની ॥ ૧૨૬॥

કર્પૂરાગરુકસ્તૂરીકુઙ્કુમદ્રવલેપિતા ।
વિચિત્રરત્નપૃથિવીકલ્પશાખિતલસ્થિતા ॥ ૧૨૭॥

રત્નદીપસ્ફુરદ્રત્નસિંહાસનનિવાસિની ।
ષટ્ચક્રભેદનકરી પરમાનન્દરૂપિણી ॥ ૧૨૮॥

સહસ્રદલપદ્માન્તા ચન્દ્રમણ્ડલવર્તિની ।
બ્રહ્મરૂપા શિવક્રોડા નાનાસુખવિલાસિની ॥ ૧૨૯॥

હરવિષ્ણુવિરિઞ્ચેન્દ્રગ્રહનાયકસેવિતા ।
શિવા શૈવા ચ રુદ્રાણી તથૈવ શિવનાદિની ॥ ૧૩૦॥

મહાદેવપ્રિયા દેવી તથૈવાનઙ્ગમેખલા ।
ડાકિની યોગિની ચૈવ તથોપયોગિની મતા ॥ ૧૩૧॥

માહેશ્વરી વૈષ્ણવી ચ ભ્રામરી શિવરૂપિણી ।
અલમ્બુસા ભોગવતી ક્રોધરૂપા સુમેખલા ॥ ૧૩૨॥

ગાન્ધારી હસ્તિજિહ્વા ચ ઇડા ચૈવ શુભઙ્કરી ।
પિઙ્ગલા દક્ષસૂત્રી ચ સુષુમ્ના ચૈવ ગાન્ધિની ॥ ૧૩૩॥

ભગાત્મિકા ભગાધારા ભગેશી ભગરૂપિણી ।
લિઙ્ગાખ્યા ચૈવ કામેશી ત્રિપુરા ભૈરવી તથા ॥ ૧૩૪॥

લિઙ્ગગીતિસ્સુગીતિશ્ચ લિઙ્ગસ્થા લિઙ્ગરૂપધૃક્ ।
લિઙ્ગમાલા લિઙ્ગભવા લિઙ્ગાલિઙ્ગા ચ પાવકી ॥ ૧૩૫॥

ભગવતી કૌશિકી ચ પ્રેમરૂપા પ્રિયંવદા ।
ગૃધ્રરૂપી શિવારૂપા ચક્રેશી ચક્રરૂપધૃક્ ॥ ૧૩૬॥ (દૃધ્ર)

આત્મયોનિર્બ્રહ્મયોનિર્જગદ્યોનિરયોનિજા ।
ભગરૂપા ભગસ્થાત્રી ભગિની ભગમાલિની ॥ ૧૩૭॥

ભગાત્મિકા ભગાધારા રૂપિણી ભગશાલિની ।
લિઙ્ગાભિધાયિની લિઙ્ગપ્રિયા લિઙ્ગનિવાસિની ॥ ૧૩૮॥

લિઙ્ગસ્થા લિઙ્ગિની લિઙ્ગરૂપિણી લિઙ્ગસુન્દરી ।
લિઙ્ગગીતિર્મહાપ્રીતિર્ભગગીતિર્મહાસુખા ॥ ૧૩૯॥

લિઙ્ગનામસદાનન્દા ભગનામસદારતિઃ ।
ભગનામસદાનન્દા લિઙ્ગનામસદારતિઃ ॥ ૧૪૦॥

લિઙ્ગમાલકરાભૂષા ભગમાલાવિભૂષણા ।
ભગલિઙ્ગામૃતવૃતા ભગલિઙ્ગામૃતાત્મિકા ॥ ૧૪૧॥

ભગલિઙ્ગાર્ચનપ્રીતા ભગલિઙ્ગસ્વરૂપિણી ।
ભગલિઙ્ગસ્વરૂપા ચ ભગલિઙ્ગસુખાવહા ॥ ૧૪૨॥

સ્વયમ્ભૂકુસુમપ્રીતા સ્વયમ્ભૂકુસુમાર્ચિતા ।
સ્વયમ્ભૂકુસુમપ્રાણા સ્વયમ્ભૂકુસુમોત્થિતા ॥ ૧૪૩॥

સ્વયમ્ભૂકુસુમસ્નાતા સ્વયમ્ભૂપુષ્પતર્પિતા ।
સ્વયમ્ભૂપુષ્પઘટિતા સ્વયમ્ભૂપુષ્પધારિણી ॥ ૧૪૪॥

સ્વયમ્ભૂપુષ્પતિલકા સ્વયમ્ભૂપુષ્પચર્ચિતા ।

સ્વયમ્ભૂપુષ્પનિરતા સ્વયમ્ભૂકુસુમાગ્રહા ॥ ૧૪૫॥

સ્વયમ્ભૂપુષ્પયજ્ઞેશા સ્વયમ્ભૂકુસુમાલિકા । (યજ્ઞાશા યજ્ઞાઙ્ગા)
સ્વયમ્ભૂપુષ્પનિચિતા સ્વયમ્ભૂકુસુમાર્ચિતા ॥ ૧૪૬॥ (કુસુમપ્રિયા)

સ્વયમ્ભૂકુસુમાદાનલાલસોન્મત્તમાનસા ।
સ્વયમ્ભૂકુસુમાનન્દલહરી સ્નિગ્ધદેહિની ॥ ૧૪૭॥

સ્વયમ્ભૂકુસુમાધારા સ્વયમ્ભૂકુસુમાકુલા ।
સ્વયમ્ભૂપુષ્પનિલયા સ્વયમ્ભૂપુષ્પવાસિની ॥ ૧૪૮॥

સ્વયમ્ભૂકુસુમાસ્નિગ્ધા સ્વયમ્ભૂકુસુમાત્મિકા ।
સ્વયમ્ભૂપુષ્પકરિણી સ્વયમ્ભૂપુષ્પમાલિકા ॥ ૧૪૯॥

સ્વયમ્ભૂકુસુમન્યાસા સ્વયમ્ભૂકુસુમપ્રભા ।
સ્વયમ્ભૂકુસુમજ્ઞાના સ્વયમ્ભૂપુષ્પભોગિની ॥ ૧૫૦॥

સ્વયમ્ભૂકુસુમોલ્લાસા સ્વયમ્ભૂપુષ્પવર્ષિણી ।
સ્વયમ્ભૂકુસુમાનન્દા સ્વયમ્ભૂપુષ્પપુષ્પિણી ॥ ૧૫૧॥

સ્વયમ્ભૂકુસુમોત્સાહા સ્વયમ્ભૂપુષ્પરૂપિણી ।
સ્વયમ્ભૂકુસુમોન્માદા સ્વયમ્ભૂપુષ્પસુન્દરી ॥ ૧૫૨॥

સ્વયમ્ભૂકુસુમારાધ્યા સ્વયમ્ભૂકુસુમોદ્ભવા ।
સ્વયમ્ભૂકુસુમાવ્યગ્રા સ્વયમ્ભૂપુષ્પપૂર્ણિતા ॥ ૧૫૩॥

સ્વયમ્ભૂપૂજકપ્રાજ્ઞા સ્વયમ્ભૂહોતૃમાત્રિકા ।
સ્વયમ્ભૂદાતૃરક્ષિત્રી સ્વયમ્ભૂભક્તભાવિકા ॥ ૧૫૪॥

સ્વયમ્ભૂકુસુમપ્રીતા સ્વયમ્ભૂપૂજકપ્રિયા ।
સ્વયમ્ભૂવન્દકાધારા સ્વયમ્ભૂનિન્દકાન્તકા ॥ ૧૫૫॥

સ્વયમ્ભૂપ્રદસર્વસ્વા સ્વયમ્ભૂપ્રદપુત્રિણી ।
સ્વયમ્ભૂપ્રદસસ્મેરા સ્વયમ્ભૂતશરીરિણી ॥ ૧૫૬॥

સર્વલોકોદ્ભવપ્રીતા સર્વકાલોદ્ભવાત્મિકા ।
સર્વકાલોદ્ભવોદ્ભાવા સર્વકાલોદ્ભવોદ્ભવા ॥ ૧૫૭॥

કુન્દપુષ્પસમાપ્રીતિઃ કુન્દપુષ્પસમારતિઃ ।
કુન્દગોલોદ્ભવપ્રીતા કુન્દગોલોદ્ભવાત્મિકા ॥ ૧૫૮॥

સ્વયમ્ભૂર્વા શિવા શક્તા પાવિની લોકપાવિની ।
કીર્તિર્યશસ્વિની મેધા વિમેધા સુરસુન્દરી ॥ ૧૫૯॥

અશ્વિની કૃત્તિકા પુષ્યા તેજસ્વી ચન્દ્રમણ્ડલા ।
સૂક્ષ્મા સૂક્ષ્મપ્રદા સૂક્ષ્માસૂક્ષ્મભયવિનાશિની ॥ ૧૬૦॥

વરદાઽભયદા ચૈવ મુક્તિબન્ધવિનાશિની ।
કામુકી કામદા ક્ષાન્તા કામાખ્યા કુલસુન્દરી ॥ ૧૬૧॥

સુખદા દુઃખદા મોક્ષા મોક્ષદાર્થપ્રકાશિની ।
દુષ્ટાદુષ્ટમતી ચૈવ સર્વકાર્યવિનાશિની ॥ ૧૬૨॥

શુક્રધારા શુક્રરૂપા શુક્રસિન્ધુનિવાસિની ।
શુક્રાલયા શુક્રભોગા શુક્રપૂજા સદારતિઃ ॥ ૧૬૩॥

શુક્રપૂજ્યા શુક્રહોમસન્તુષ્ટા શુક્રવત્સલા ।
શુક્રમૂર્તિઃ શુક્રદેહા શુક્રપૂજકપુત્રિણી ॥ ૧૬૪॥

શુક્રસ્થા શુક્રિણી શુક્રસંસ્પૃહા શુક્રસુન્દરી ।
શુક્રસ્નાતા શુક્રકરી શુક્રસેવ્યાતિશુક્રિણી ॥ ૧૬૫॥

મહાશુક્રા શુક્રભવા શુક્રવૃષ્ટિવિધાયિની ।
શુક્રાભિધેયા શુક્રાર્હા શુક્રવન્દકવન્દિતા ॥ ૧૬૬॥

શુક્રાનન્દકરી શુક્રસદાનન્દવિધાયિની ।
શુક્રોત્સાહા સદાશુક્રપૂર્ણા શુક્રમનોરમા ॥ ૧૬૭॥

શુક્રપૂજકસર્વસ્થા શુક્રનિન્દકનાશિની ।
શુક્રાત્મિકા શુક્રસમ્પચ્છુક્રાકર્ષણકારિણી ॥ ૧૬૮॥

રક્તાશયા રક્તભોગા રક્તપૂજાસદારતિઃ ।
રક્તપૂજ્યા રક્તહોમા રક્તસ્થા રક્તવત્સલા ॥ ૧૬૯॥

રક્તપૂર્ણા રક્તદેહા રક્તપૂજકપુત્રિણી ।
રક્તાખ્યા રક્તિની રક્તસંસ્પૃહા રક્તસુન્દરી ॥ ૧૭૦॥

રક્તાભિદેહા રક્તાર્હા રક્તવન્દકવન્દિતા ।
મહારક્તા રક્તભવા રક્તવૃષ્ટિવિધાયિની ॥ ૧૭૧॥

રક્તસ્નાતા રક્તપ્રીતા રક્તસેવ્યાતિરક્તિની ।
રક્તાનન્દકરી રક્તસદાનન્દવિધાયિની ॥ ૧૭૨॥

રક્તારક્તા રક્તપૂર્ણા રક્તસેવ્યક્ષિણીરમા । (રક્તસેવ્યા મનોરમા)
રક્તસેવકસર્વસ્વા રક્તનિન્દકનાશિની ॥ ૧૭૩॥

રક્તાત્મિકા રક્તરૂપા રક્તાકર્ષણકારિણી ।
રક્તોત્સાહા રક્તવ્યગ્રા રક્તપાનપરાયણા ॥ ૧૭૪॥ (રક્તોત્સાહા રક્તાઢ્યા)

શોણિતાનન્દજનની કલ્લોલસ્નિગ્ધરૂપિણી ।
સાધકાન્તર્ગતા દેવી પાર્વતી પાપનાશિની ॥ ૧૭૫॥

સાધૂનાં હૃદિસંસ્થાત્રી સાધકાનન્દકારિણી ।
સાધકાનાં ચ જનની સાધકપ્રિયકારિણી ॥ ૧૭૬॥

સાધકપ્રચુરાનન્દસમ્પત્તિસુખદાયિની ।
સાધકા સાધકપ્રાણા સાધકાસક્તમાનસા ॥ ૧૭૭॥ (શારદા)

સાધકોત્તમસર્વસ્વાસાધકા ભક્તરક્તપા । (ભક્તવત્સલા)
સાધકાનન્દસન્તોષા સાધકારિવિનાશિની ॥ ૧૭૮॥

આત્મવિદ્યા બ્રહ્મવિદ્યા પરબ્રહ્મકુટુમ્બિની ।
ત્રિકૂટસ્થા પઞ્ચકૂટા સર્વકૂટશરીરિણી ॥ ૧૭૯॥

સર્વવર્ણમયી વર્ણજપમાલાવિધાયિની ।
ઇતિ શ્રીકાલિકાનામ્નાં સહસ્રં શિવભાષિતમ્ ॥ ૧૮૦॥

ફલશ્રુતિઃ ।
ગુહ્યાત્ ગુહ્યતરં સાક્ષાન્મહાપાતકનાશનમ્ ।
પૂજાકાલે નિશીથે ચ સન્ધ્યયોરુભયોરપિ ॥ ૧॥

લભતે ગાણપત્યં સ યઃ પઠેત્સાધકોત્તમઃ ।
યઃ પઠેત્પાઠયેદ્વાપિ શૃણોતિ શ્રાવયેદપિ ॥ ૨॥

સર્વપાપવિનિર્મુક્તઃ સ યાતિ કાલિકાપદમ્ ।
શ્રદ્ધયાઽશ્રદ્ધયા વાપિ યઃ કશ્ચિન્માનવઃ પઠેત્ ॥ ૩॥

દુર્ગાદ્દુર્ગતરં તીર્ત્વા સ યાતિ કાલિકાપદમ્ ।
વન્ધ્યા વા કાકવન્ધ્યા વા મૃતપુત્રા ચ યાઙ્ગના ॥ ૪॥

શ્રુત્વા સ્તોત્રમિદં પુત્રાન્ લભતે ચિરજીવિનઃ ।
યં યં કામયતે કામં પઠન્ સ્તોત્રમનુત્તમમ્ ॥ ૫॥

દેવીવરપ્રદાનેન તં તં પ્રાપ્નોતિ નિત્યશઃ ।
સ્વયમ્ભૂકુસુમૈઃ શુક્લૈઃ સુગન્ધિકુસુમાન્વિતૈઃ ॥ ૬॥

Some versions include about 50 verses in this place but they appear
to be related to tAntric practices so are omitted here
ગુરુવિષ્ણુમહેશાનામભેદેન મહેશ્વરી ।
સમન્તાદ્ભાવયેન્મન્ત્રી મહેશો નાત્ર સંશયઃ ॥ ૭॥

સ શાક્તઃ શિવભક્તશ્ચ સ એવ વૈષ્ણવોત્તમઃ ।
સમ્પૂજ્ય સ્તૌતિ યઃ કાલીમદ્વૈતભાવમાવહન્ ॥ ૮॥

દેવ્યાનન્દેન સાનન્દો દેવીભક્ત્યૈકભક્તિમાન્ ।
સ એવ ધન્યો યસ્યાર્થે મહેશો વ્યગ્રમાનસઃ ॥ ૯॥

કામયિત્વા યથાકામં સ્તવમેનમુદીરયેત્ ।
સર્વરોગૈઃ પરિત્યક્તો જાયતે મદનોપમઃ ॥ ૧૦॥

ચક્રં વા સ્તવમેનં વા ધારયેદઙ્ગસઙ્ગતમ્ ।
વિલિખ્ય વિધિવત્સાધુઃ સ એવ કાલિકાતનુઃ ॥ ૧૧॥

દેવ્યૈ નિવેદિતં યદ્યત્તસ્યાંશં ભક્ષયેન્નરઃ ।
દિવ્યદેહધરો ભૂત્વા દેવ્યાઃ પાર્શ્વધરો ભવેત્ ॥ ૧૨॥

નૈવેદ્યનિન્દકં દૃષ્ટ્વા નૃત્યન્તિ યોગિનીગણાઃ ।
રક્તપાનોદ્યતાસ્સર્વા માંસાસ્થિચર્વણોદ્યતાઃ ॥ ૧૩॥

તસ્માન્નિવેદિતં દેવ્યૈ દૃષ્ટ્વા શ્રુત્વા ચ માનવઃ ।
ન નિન્દેન્મનસા વાચા કુષ્ઠવ્યાધિપરાઙ્મુખઃ ॥ ૧૪॥

આત્માનં કાલિકાત્માનં ભાવયન્ સ્તૌતિ યઃ શિવામ્ ।
શિવોપમં ગુરું ધ્યાત્વા સ એવ શ્રીસદાશિવઃ ॥ ૧૫॥

યસ્યાલયે તિષ્ઠતિ નૂનમેતત્સ્તોત્રં ભવાન્યા લિખિતં વિધિજ્ઞૈઃ ।
ગોરોચનાલક્તકકુઙ્કુમાક્તકર્પૂરસિન્દૂરમધુદ્રવેણ ॥ ૧૬॥

ન તત્ર ચોરસ્ય ભયં ન હાસ્યો ન વૈરિભિર્નાઽશનિવહ્નિભીતિઃ ।
ઉત્પાતવાયોરપિ નાઽત્રશઙ્કા લક્ષ્મીઃ સ્વયં તત્ર વસેદલોલા ॥ ૧૭॥

સ્તોત્રં પઠેત્તદનન્તપુણ્યં દેવીપદામ્ભોજપરો મનુષ્યઃ ।
વિધાનપૂજાફલમેવ સમ્યક્ પ્રાપ્નોતિ સમ્પૂર્ણમનોરથોઽસૌ ॥ ૧૮॥

મુક્તાઃ શ્રીચરણારવિન્દનિરતાઃ સ્વર્ગામિનો ભોગિનો
બ્રહ્મોપેન્દ્રશિવાત્મકાર્ચનરતા લોકેઽપિ સંલેભિરે ।
શ્રીમચ્છઙ્કરભક્તિપૂર્વકમહાદેવીપદધ્યાયિનો
મુક્તિર્ભુક્તિમતિઃ સ્વયં સ્તુતિપરાભક્તિઃ કરસ્થાયિની ॥ ૧૯॥

ઇતિ શ્રીકાલિકાકુલસર્વસ્વે હરપરશુરામસંવાદે
શ્રીકાલિકાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and Proofread by Ravindra Bhalekar ravibhalekar at hotmail.com
Reproofread by Shashipal Sharma shashipal1313 at rediffmail.com,
PSA Easwaran, and Kirk Wortman kirkwort at hotmail.com

---

*Shri Kali Sahasranama Stotram*
pdf was typeset on June 3, 2023

Please send corrections to *sanskrit@cheerful.com*